समन्तिकं,क्ली,सिन्दूरम्। इति केचित्॥सीमन्त-शब्दात् ष्णिकप्रत्ययेन निष्पन्नम्॥

सैरन्ध्री, स्त्री, (स्वैरं स्वाच्छन्द्यं धरतीति। धृ+मूलविभुजादित्वात् कः। पृषोदरादित्वात् साधुः।) अन्यवेश्मस्था स्वतन्त्रा शिल्पजीविनी। इत्यमरः। २। ६। १८। (यथा, महाभारते। ३। ६५। ५१।
"सैरन्ध्रीमभिजानीष्व सुनन्दे देवरूपिणीम्।
वयसा तुल्यतां प्राप्ता सखी तव भवत्वियम्॥")
द्रौपदी। इति हेमचन्द्रः॥ (वर्णसङ्करसम्भूत-स्त्री। यथा, महाभारते। १३। ४८। १९।
"अगम्यागमनाच्चैव जायते वर्णसङ्करः।
बाह्यानामनुजायन्ते सैरन्ध्र्यां मागधेषु च।
प्रसाधनोपचारज्ञमदासन्दासजीवनम्॥")

सैरिकः, पुं, (सीर+ठक्।) सीरेण लाङ्गलेन खनति यः। कृषाण् इति भाषा॥ (सीरं वह-तीति। सीर+"हलसीरात् ठक्।" ४। ४। ८१। इति ठक्।) सीरस्य वोढ़ा। हेलेगरु इति भाषा॥ (सीरस्येदमिति। "हलसीरात् ठक्।" ४। ३। १२४। इति ठक्।) सीर-सम्बन्धिनि, त्रि। तेषां पर्य्यायः। हालिकः २ लाङ्गलिकः ३। इत्यमरः। २। ९। ६४॥

सैरिन्ध्री, स्त्री, (स्वैरं स्वातन्त्र्यं धरतीति। धृ+मूलविभुजादित्वात् कः। पृषोदरादित्वात् साधुः। गौरादित्वात् ङीष्।) परवेश्मस्था स्ववशा शिल्पकारिका। इत्यमरः। २। ६। १८॥ तत्पर्य्यायः। सैरन्ध्री २ सैरिन्ध्रिः३। इति तट्टीका॥ (यथा, महाभारते। ४। ८। २।
"वासश्च परिधायैकं कृष्णं सुमलिनं महत्।
कृत्वा वेशं हि सैरिन्ध्र्याः कृष्णा व्यचरत् तदा॥")
वर्णसङ्करसम्भूतस्त्री। महल्लिका। इति मेदिनी। द्रौपदी। इति धरणिः॥ (यथा, महाभारते। ४। २३। ५।
"यथा सैरिन्ध्रीदोषेण न ते राजन्निदं पुरम्।
विनाशमेति वै क्षिप्रं तथा नीतिर्विधीयताम्॥")

सैरिभः, पुं, (सीरे लाङ्गलवहने इभ इव। शक-न्ध्वादित्वात् साधुः। ततः स्वार्थे अण्।) महिषः। इत्यमरः। २। ५। ४॥ स्वर्गः। इति त्रिकाण्ड-शेषः॥

सैरीयः, पुं, (सीरे भवः। अण्। सैरः कर्षस्तत्र भवः। वृद्धात् छः।) झिण्टी। इति शब्द-रत्नावली॥

सैरीयकः, पुं, (सैरीय एव। स्वार्थे संज्ञायां वा कन्।) झिण्टी। इत्यमरः। २। ४। ७५॥ अस्य गुणः। कफवातनाशित्वम्। इति राज-वल्लभः॥

सैरेयः, पुं,(सैरे कर्षे भवः। सैर+"नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्।) झिण्टी। इति शब्दमाला भरतश्च॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते॥"
अथास्य गुणाः।
"सैरेयः कुष्ठवातास्रकफकण्डूविषापहः।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सैरेयकः,पुं,(सैरेय एव। स्वार्थे कन्।) झिण्टी। इति राजनिर्घण्टो भरतश्च॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते॥")

सैवालं, क्ली, शैवालम्। यथा,—
"या पांशुपाण्डरवपुर्व्विरसा पुरासीत्
सैवालकाङ्कुरलतामधुना बिभर्त्ति।
वक्रं प्रसर्पति तनोर्वितनोति लक्ष्मीं
प्रायः पयोधरसमुन्नतिरत्र हेतुः॥"
इति प्रसिद्धश्लेषकाव्यम्॥

सोः, स्त्री, पार्व्वती। इति केचित्॥ षोधातोः क्विप्प्रत्ययेन निष्पन्ना॥

सोढः, त्रि, (सह मर्षणे+क्तः। "सहिवहोरोद-वर्णस्य।" ६। ३। ११२। इति अवर्णस्य ओत्।) क्षान्तः। इत्यमरः। ३। १। ९७॥ दुःखादिसहनशीलः। इति तट्टीकायां नील-कण्ठः॥

सोढ़ा, [ ऋ ] त्रि, (सहते इति। सह+तृच्।) क्षमायुक्तः। शक्तः। इति मेदिनी॥ (यथा, महाभारते। ७। २६। ६।
"सोढ़ा शस्त्रनिपातानामग्निस्पर्शस्य चानघ।
स पाण्डवबलं सर्व्वमथैको नाशयिष्यति॥")

सोत्कण्ठः, त्रि, (उत्कण्ठया सह वर्त्तमानः।) उत्कण्ठायुक्तः। तत्पर्य्यायः। उत्कः २ उन्मनाः ३। इति जटाधरः॥ (यथा, कथासरित्-सागरे। ३१। ४५।
"तत्रोद्यानगतं सा तं वत्सेशं सख्युदीरितम्।
ददर्श दूरात् सोत्कण्ठा चकोरीवामृतत्विषम्॥")

सोत्प्रासं, क्ली, (उत्प्रासेन सह वर्त्तमानम्।) प्रियावाक्यम्। यथा, शब्दरत्नावल्याम्।
"सोल्लुण्ठनन्तु सोत्प्रासं चटु चाटु प्रियोदितम्॥"

सोत्प्रासः, पुं, (उत्प्रासेन आधिक्येन सह वर्त्त-मानः।) सशब्दहास्यम्। यथा,—
"सोत्प्रास आच्छुरितकमवच्छुरितकं तथा।
अट्टहासो महाहासो हासः प्रहास इत्यपि॥"
इति शब्दरत्नावली॥

सोदयं,त्रि,उदयेन सह वर्त्तमानम्। वृद्धियुक्तम्। सुद् समेत् इति भाषा। यथा,—
"दत्तां कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम्
मृतायां वर आदद्यात् परिशोध्योभयव्ययम्॥"
इत्युद्वाहतत्त्वधृतयाज्ञवल्क्यवचनम्॥

सोदरः, पुं, (सह समानं उदरं यस्य। सहस्य सः।) सहोदरः। इति शब्दरत्नावली॥ (यथा, मनुः। ८। २९९।
"भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥")

सोदरा, स्त्री, सहोदरा भगिनी। इति सोदर-शब्दादाप्प्रत्ययेन निष्पन्ना॥

सोदर्य्यः, पुं, (समानोदरे शयितः। सोदर+"सोदरात् यः।"४।४।१०९। इति यः।) सहो-दरः। इत्यमरः।२।६।३४॥ (यथा,रघुः।१५।२६।
"स हत्वा लवणं वीरस्तदा मेने महौजसम्।
भ्रातुः सोदर्य्यमात्मानमिन्द्रजिद्वधशोभिनः॥")

सोनहः, पुं, लसुनम्। इति शब्दरत्नावली॥

सोन्मादः, त्रि, (उन्मादेन सह वर्त्तमानः।) उन्मदः। उन्मदिष्णुः। तस्य रूपान्तराणि यथा। उन्मादः। सून्मादः। सून्मदः। इत्य-मरटीकायां भरतः। ३। १। २३॥

सोपकरणं, त्रि, उपकरणेन सह वर्त्तमानम्। उपकरणविशिष्टम्। यथा,—
"एवञ्च अमुककाम इति सोपकरणं वत्सतरी-चतुष्टययुक्तं वृषमिति चाभिलप्य उत्सर्गः सङ्ग-च्छते।" इति वृषोत्सर्गतत्त्वम्॥ इदं सोप-करणमामान्ननैवेद्यममुकदेवतायै नमः। इति च पूजापद्धतिः॥

सोपकारः, त्रि, उपकारविशिष्टः। उपकारेण सह वर्त्तमान इति बहुव्रीहिसमासे कृते सह-शब्दस्य सादेशेन निष्पन्नः॥

सोपधं, त्रि, (उपधया सह वर्त्तमानमिति।) सच्छद्मदानादि। यथा हारीतः। अथासद्व्य-दानमस्वर्ग्यं यच्च दत्त्वा परितप्यते। तद्व्यदान-मफलं यच्चोपकारिणे ददाति तच्चाव्यं परि-क्लिष्टं यच्च सोपधं ददाति अन्यश्रावितमल्पं यच्चापात्राय ददाति अनिष्टदानं स्रवति यच्च दत्त्वा प्रकीर्त्तयते क्षयदानं यच्चाश्रद्धया ददाति क्रोधाद्राक्षसं यच्चाक्रुश्य ददाति दत्त्वा वाक्रो-शति असत्कृतं पैशाचं यच्चावज्ञातं ददाति दत्त्वा वावजानीते मुमूर्षोस्तामसं यच्चाप्रकृतो ददाति। एते दानोपसर्गा यैरुपसृष्टं दान-मप्रसिद्धमस्वर्ग्यमयशस्यमभ्युदयफलं भवत्यल्पफलं वेति। तर्हि त्यागानन्तरकाले हस्तार्पणसम्भवे-ऽपि अदानमसमर्पणम्। उपकारिणे व्यसनो-पकारिणे। तच्चाव्यं यथोक्तोपकरणरहितम्। सोपधं सच्छद्म। अन्यश्रावितं लोकसम्भाव-नार्थं प्रकाशितम्। अनिष्टदानं शववे दानम्। क्षयो मानभङ्गः। अप्रकृतो भयादिमान्। इति शुद्धितत्त्वम्॥

सोपप्लवः,पुं,(उपप्लवेन सह वर्त्तमानः।) राहु-ग्रस्तः चन्द्रः सूर्य्यश्च। इत्यमरः। १। ४। १०॥

सोपवासः, त्रि, (उपवासेन सह वर्त्तमानः।) उपवासविशिष्टः। यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥"
इति तिथ्यादितत्त्वे याज्ञवल्क्यवचनम्॥

सोपाकः,पुं,श्वपाकः। इति केचित्॥(चण्डालात् पुक्कस्यां समुत्पन्नोऽन्त्यजजातिविशेषः। यथा, मनुः। १०। ३८।
"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥")